श्रीमते रामानुजाय नमः

**श्री काञ्चिपूर्णमुनिभिरनुगृहीतं**

# ॥ देवराजाष्टकम् ॥

श्रीमत् काञ्चिमुनिं वन्दे कमलापतिनन्दनम्।
वरदाङ्घ्रि सदासङ्ग रसायन परायणम्॥

देवराजदयापात्रं श्रीकाञ्चिपूर्णमुत्तमम्।
रामानुजमुनेर्मान्यं वन्देऽहं सज्जनाश्रयम्॥

नमस्ते हस्तिशैलेश! श्रीमन्नम्बुजलोचन!।
शरणं त्वां प्रपन्नोऽस्मि प्रणतार्तिहराच्युत!॥ १

समस्त प्राणि सन्त्राण प्रवीण करुणोल्बण।
विलसन्तु कटाक्षास्ते मय्यस्मिन् जगतां पते!॥ २

निन्दिताचारकरणं निवृत्तं कृत्यकर्मणः।
पापीयांसममर्यादं पाहि मां वरदप्रभो!॥ ३

संसारमरुकान्तारे दुर्व्याधिव्याघ्रभीषणे।
विषयक्षुद्रगुल्माढ्ये तृषापादपशालिनि॥ ४

पुत्रदारगृहक्षेत्रमृगतृष्णाम्बुपुष्कले।
कृत्याकृत्यविवेकान्धं परिभ्रान्तमितस्ततः॥ ५

अजस्रं जाततृष्णार्तमवसन्नाङ्गमक्षमम्।
क्षीणशक्तिबलारोग्यं केवलं क्लेशसंश्रयम्॥ ६

श्रीमते रामानुजाय नमः

सन्तप्तं विविधैर्दुःखैर्दुर्वचैरेवमादिभिः।
देवराज! दयासिन्धो! देवदेव! जगत्पते!॥ ७

त्वदीक्षणसुधासिन्धुवीचिविक्षेपशीकरैः।
कारुण्यमारुतानीतैः शीतलैरभिषिञ्च माम्॥ ८

**॥ इति देवराजाष्टकं समाप्तम्॥**